योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०५५

पञ्चपञ्चाशः सर्गः ५५

प्रबुद्धलीलोवाच ।

यथैव जन्तुर्म्रियते जायते च यथा पुनः ।

तन्मे कथय देवेशि पुनर्बोधविवृद्धये ।। १

श्रीदेव्युवाच ।

नाडीप्रवाहे विधुरे यदा वातविसंस्थितिम् ।

जन्तुः प्राप्नोति हि तदा शाम्यतीवास्य चेतना ।। २

शुद्धं हि चेतनं नित्यं नोदेति न च शाम्यति ।

स्थावरे जङ्गमे व्योम्नि शैलेऽग्नौ पवने स्थितम् ।। ३

केवलं वातसंरोधाद्यदा स्पन्दः प्रशाम्यति ।

मृत इत्युच्यते देहस्तदासौ जडनामकः ।। ४

तस्मिन्देहे शवीभूते वाते चानिलतां गते ।

चेतनं वासनामुक्तं स्वात्मतत्त्वेऽवतिष्ठति ।। ५

जीव इत्युच्यते तस्य नामाणोर्वासनावतः ।

तत्रैवास्ते स च शवागारे गगनके तथा ।। ६

ततोऽसौ प्रेतशब्देन प्रोच्यते व्यवहारिभिः ।

चेतनं वासनामिश्रमामोदानिलवत्स्थितम् ।। ७

इदं दृश्यं परित्यज्य यदास्ते दर्शनान्तरे ।

स स्वप्न इव संकल्प इव नानाकृतिस्तदा ।। ८

तस्मिन्नेव प्रदेशेऽन्तः पूर्ववत्स्मृतिमान्भवेत् ।

तदैव मृतिमूर्च्छान्ते पश्यत्यन्यशरीरकम् ।। ९

आत्मन्यस्ति घटापुष्टमन्यस्य व्योम केवलम् ।

आकाशभूतले साकं साकाशशशिवासरम् ।। १०

भवन्ति षड्विधाः प्रेतास्तेषां भेदमिमं श्रृणु ।

सामान्यपापिनो मध्यपापिनः स्थूलपापिनः ।। ११

सामान्यधर्मा मध्यमधर्मा चोत्तमधर्मवान् ।

एतेषां कस्यचिद्भेदो द्वौ त्रयोऽप्यथ कस्यचित् ।। १२

कश्चिन्महापातकवान्वत्सरं स्मृतिमूर्च्छनम् ।

विमूढोऽनुभवत्यन्तः पाषाणहृदयोपमः ।। १३

ततः कालेन संबुद्धो वासनाजठरोदितम् ।

अनुभूय चिरं कालं नारकं दुःखमक्षयम् ।। १४

भुक्त्वा योनिशतान्युच्चैर्दुःखाद्दुःखान्तरं गतः ।

कदाचिच्छममायाति संसारस्वप्नसंभ्रमे ।। १५

अथवा मृतिमोहान्ते जडदुःखशताकुलाम् ।

क्षणाद्वृक्षादितामेव हृत्स्थामनुभवन्ति ते ।। १६

स्ववासनानुरूपाणि दुःखानि नरके पुनः ।

अनुभूयाथ योनीषु जायन्ते भूतले चिरात् ।। १७

अथ मध्यमपापो यो मृतिमोहादनन्तरम् ।

सशिलाजठरं जाड्यं कंचित्कालं प्रपश्यति ।। १८

ततः प्रबुद्धः कालेन केनचिद्वा तदैव वा ।

तिर्यगादिक्रमैर्भुक्त्वा योनीः संसारमेष्यति ।। १९

मृत एवानुभवति कश्चित्सामान्यपातकी ।

स्ववासनानुसारेण देहं संपन्नमक्षतम् ।। २०

स स्वप्न इव संकल्प इव चेतति तादृशम् ।

तस्मिन्नेव क्षणे तस्य स्मृतिरित्थमुदेति च ।। २१

ये तूत्तममहापुण्या मृतिमोहादनन्तरम् ।

स्वर्गविद्याधरपुरं स्मृत्या स्वनुभवन्ति ते। ।। २२

ततोऽन्यकर्मसदृशं भुक्त्वान्यत्र फलं निजम् ।

जायन्ते मानुषे लोके सश्रीके सज्जनास्पदे ।। २३

ये च मध्यमधर्माणो मृतिमोहादनन्तरम् ।

ते व्योमवायुवलिताः प्रयान्त्योषधिपल्लवम् ।। २४

तत्र चारुफलं भुक्त्वा प्रविश्य हृदयं नृणाम् ।

रेतसामधितिष्ठन्ति गर्भे जातिक्रमोचिते ।। २५

स्ववासनानुसारेण प्रेता एतां व्यवस्थितिम् ।

मूर्च्छान्तेऽनुभवन्त्यन्तः क्रमेणैवाक्रमेण च ।। २६

आदौ मृता वयमिति बुध्यन्ते तदनुक्रमात् ।

बन्धुपिण्डादिदानेन प्रोत्पन्ना इति वेदिनः ।। २७

ततो यमभटा एते कालपाशान्विता इति ।

नीयमानः प्रयाम्येभिः क्रमाद्यमपुरं त्विति ।। २८

उद्यानानि विमानानि शोभनानि पुनःपुनः ।

स्वकर्मभिरुपात्तानि दिव्यानीत्येव पुण्यवान् ।। २७

हिमानीकण्टकश्वभ्रशस्त्रपत्रवनानि च ।

स्वकर्मदुष्कृतोत्थानि संप्राप्तानीति पापवान् ।। ३०

इयं मे सौम्यसंपाता सरणिः शीतशाद्वला ।

स्निग्धच्छाया सवापीका पुरःसंस्थेति मध्यमः ।। ३१

अयं प्राप्तो यमपुरमहमेष स भूतपः ।

अयं कर्मविचारोऽत्र कृत इत्यनुभूतिमान् ।। ३२

इति प्रत्येकमभ्येति पृथुः संसारखण्डकः ।

यथासंस्थितनिःशेषपदार्थाचारभासुरः ।। ३३

आकाश इव निःशून्ये शून्यात्मैव विबोधवान् ।

देशकालक्रियादैर्घ्यभासुरोऽपि न किंचन ।। ३४

इतोऽयमहमादिष्टः स्वकर्मफलभोजने ।

गच्छाम्याशु शुभं स्वर्गमितो नरकमेव च ।। ३५

यः स्वर्गोऽयं मया भुक्तो भुक्तोऽयं नरकोऽथ वा ।

इमास्ता योनयो भुक्ता जायेऽहं संसृतौ पुनः ।। ३६

अयं शालिरहं जातः क्रमात्फलमहं स्थितः ।

इत्युदर्कप्रबोधेन बुध्यमानो भविष्यति ।। ३७

संसुप्तकरणस्त्वेवं बीजतां यात्यसौ नरे

तद्बीजं योनिगलितं गर्भो भवति मातरि ।। ३८

स गर्भो जायते लोके पूर्वकर्मानुसारतः ।

भव्यो भवत्यभव्यो वा बालको ललिताकृतिः ।। ३९

ततोऽनुभवतीन्द्वाभं यौवनं मदनोन्मुखम् ।

ततो जरां पद्ममुखे हिमाशनिमिव च्युतम् ।। ४०

ततोऽपि व्याधिमरणं पुनर्मरणमूर्च्छनाम् ।

पुनः स्वप्नवदायातं पिण्डैर्देहपरिग्रहम् ।। ४१

याम्यं याति पुनर्लोकं पुनरेव भ्रमक्रमम् ।

भूयो भूयोऽनुभवति नानायोन्यन्तरोदये ।। ४२

इत्याजवं जवीभावमामोक्षमतिभासुरम् ।

भूयो भूयोऽनुभवति व्योम्न्येव व्योमरूपवान् ।। ४३

प्रबुद्धलीलोवाच ।

आदिसर्गे यथा देवि भ्रम एष प्रवर्तते ।

तथा कथय मे भूयः प्रसादाद्बोधवृद्धये ।। ४४

श्रीदेव्युवाच ।

परमार्थघनं शैलाः परमार्थघनं द्रुमाः ।

परमार्थघनं पृथ्वी परमार्थघनं नभः ।। ४५

सर्वात्मकत्वात्स यतो यथोदेति चिदीश्वरः ।

परमाकाशशुद्धात्मा तत्र तत्र भवेत्तथा ।। ४६

सर्गादौ स्वप्नपुरुषन्यायेनादिप्रजापतिः ।

यथा स्फुटं प्रकचितस्तथाद्यापि स्थिता स्थितिः ।।४७

प्रथमोऽसौ प्रतिस्पन्दः पदार्थानां हि बिम्बकम् ।

प्रतिबिम्बितमेतस्माद्यत्तदद्यापि संस्थितम् ।। ४८
यन्नाम सुषिरं स्थानं देहानां तद्गतोऽनिलः ।
करोत्यङ्गपरिस्पन्दं जीवतीत्युच्यते ततः ।। ४९
सर्गादावेवमेवैषा जङ्गमेषु स्थिता स्थितिः ।
चेतना अपि निःस्पन्दास्तेनैते पादपादयः ।। ५०
चिदाकाशोऽयमेवांशं कुरुते चेतनोदितम् ।
स एव संविद्भवति शेषं भवति नैव तत् ।। ५१
नरोपाधिपुरं प्राप्तं चेतत्यक्षिपुटं नयत् ।
तत्तस्या नाक्षिचिज्जीवं नो जीवत्येव सर्गतः ।। ५२
तथा खं खं तथा भूमिर्भूमित्वेनाप्त्ववज्जलम् ।
यद्यथा चेतति स्वैरं तद्वेत्त्येव तथा वपुः ।। ५३
इति सर्वशरीरेण जंगमत्वेन जंगमम् ।
स्थावरं स्थावरत्वेन सर्वात्मा भावयन् स्थितः ।। ५४
तस्माद्यज्जङ्गमं नाम तत्स्वबोधनरूपवत् ।
तेन बुद्धं ततस्तद्वत्तदेवाद्यापि संस्थितम् ।। ५५
यद्वृक्षाभिधमाबुद्धं स्थावरत्वेन वै पुनः ।
जडमद्यापि संसिद्धं शिलातरुतृणादि च ।। ५६
न तु जाड्यं पृथक्किंचिदस्ति नापि च चेतनम् ।
नात्र भेदोऽस्ति सर्गादौ सत्तासामान्यकेन च ।। ५७
वृक्षाणामुपलानां या नामान्तःस्थाः स्वसंविदः ।
बुद्ध्यादिविहितान्येव तानि तेषामिति स्थितिः ।। ५८
विदोन्तःस्थावरादेर्यास्तस्या बुद्ध्यास्तथा स्थितेः ।
अन्याभिधानास्थानार्थाः संकेतैरपरैः स्थिताः ।। ५९
कृमिकीटपतङ्गानां या नामान्तःस्वसंविदः ।
तान्येव तेषां बुद्ध्यादीन्यभिधार्थानि कानिचित् ।। ६०
यथोत्तराब्धिजनता दक्षिणाब्धिजनं स्थितम् ।

न किंचिदपि जानाति निजसंवेदनादृते ।। ६१

स्वसंज्ञानुभवे लीनास्तथा स्थावरजङ्गमाः ।

परस्परं यदा सर्वे स्वसंकेतपरायणाः ।। ६२

यथा शिलान्तःसंस्थानां बहिष्ठानां च वेदनम् ।

असज्जडं च भेकानां मिथोऽन्तस्तस्थुषां तथा ।। ६३

सर्वं सर्वगतं चित्तं चिद्व्योम्ना यत्प्रचेतितम् ।

सर्गादौ चोपनं वायुः स इहाद्यापि संस्थितः ।। ६४

चेतितं यत्तु सौषिर्यं तन्नभस्तत्र मारुतः ।

स्पन्दात्मेत्यादिसर्गेहाः पदार्थेष्विव चोपनम् ।। ६५

चित्तं तु परमार्थेन स्थावरे जंगमे स्थितम् ।

चोपनान्यनिलैरेव भवन्ति न भवन्ति च ।। ६६

एवं भ्रान्तिमये विश्वे पदार्थाः संविदंशवः ।

सर्गादिषु यथैवासंस्तथैवाद्यापि संस्थिताः ।। ६७

यथा विश्वपदार्थानां स्वभावस्य विजृम्भितम् ।

असत्यमेव सत्याभं तदेतत्कथितं तव ।। ६८

अयमस्तं गतः प्रायः पश्य राजा विदूरथः ।

मालाशवस्य पद्मस्य पत्युस्ते याति हृद्गतम् ।। ६९

प्रबुद्धलीलोवाच ।

केन मार्गेण देवेशि यात्येष शवमण्डपम् ।

एनमेवाशु पश्यन्त्यावावां गच्छाव उत्तमे ।। ७०

श्रीदेव्युवाच ।

मनुष्यवासनान्तस्थं मार्गमाश्रित्य गच्छति ।

एषोऽहमपरं लोकं दूरं यामीति चिन्मयः ।। ७१

मार्गेणैवमनेनैव यावस्तेयेन (?) संमतम् ।

परस्परेच्छाविच्छित्तिर्न हि सौहार्दबन्धनी ।। ७२

श्रीवसिष्ठ उवाच ।

इति विहितकथागतक्लमायां

परमदृशि प्रसृते विबोधभानौ ।

नृपतिवरसुतामनस्युदारे

विगलितचित्तजडो विदूरथोऽभूत् ।। ७३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूत्पत्तिप्रकरणे लीलो० संसारमरणावस्थावर्णनं नाम

पञ्चपञ्चाशः सर्गः ।।५५।।